१रोगे ४अस्त्रभेदे ५हतौ च स्त्री जटाधरकोषः ।

**हनुग्रह** पु० हनुजाते रोगभेदे तन्निदानादि “जिह्वा निर्लेखनाच्छुष्कभक्षणादभिघाततः । कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनुम् । करोति विवृतास्यत्वमथ वा संवृतास्यताम् । हनुग्रहः स तेन स्यात् कृच्छ्राच्चर्वणभाषणम्” । स्रंसयित्वा अधःकृत्वा विवृतास्यत्वं व्यात्तमुखत्वम् । निर्लेखनं कर्षणम् शुष्कं चणकादि संवृतास्यत्वं दन्तलग्नताम्” भावप्र० हनुस्तम्भाऽप्यत्र ।

**हनु(नू)मत्** पु० हनु(नू)+अस्त्यर्थे मतुप् । रामस्य अनुचरे अञ्जनागर्भजाते पवनतनये वानरभेदे त्रिका० ।

**हनूष** पुंस्त्री० हन-ऊषन् । राक्षसे त्रिका० स्त्रियां ङीप् ।

**हन्त** अव्य० हन-त । १हर्षे २अनुकम्पायां ३विषादे अमरः । ४वाक्यारम्भे ५आर्त्तौ इत्यादै ७सम्भ्रमे शब्दच० । ८खेदे मेदि० ९अन्नकल्पने च अजयपालः ।

**हन्तकार** पु० हन्तेत्यस्य कारः करणं उच्चारणम् वा कृ-घञ् । १अतिथये अन्नदाने २हन्तशब्दप्रयोगे च ।

**हन्तु** पु० हन-तुन् । १मृत्यौ २हवे च ।

**हन्तृ** त्रि० हन-तृच् । १हननकर्त्तरि २सततहननानुशीलयितरि च स्त्रियां ङीप् । “मद्विप्रासुरहन्त्र्यास प्रतिष्ठा दक्षिणायने” देवप्र०त० ।

**हम्** त्रि० हद-क्त । कृतपुरीषोत्सर्गे अमरः ।

**हपुषा** स्त्री हेति पुष्यति पुष-क । मरीचतुल्यवर्त्तुलकृष्णवर्णवस्तुनि ओषधद्रव्यविशेषे । पृषो० ह्रस्य सः तत्रार्थे । “हपुषा हपुषा विस्रा पराऽन्यत्स्वल्पफला स्मृता । मत्स्यगन्धा प्लीहहन्त्री विषघ्नी ध्वाङ्क्षनाशिनी । हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः । पित्तोदरप्रमेहार्शोग्रहणीगुल्मशूलहृत् । पराप्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि” भावप्र० ।

**हम्** अव्य० हा-डम् । १रुषोक्तौ २अनुनये च मेदि० ।

**हम्भा(म्भा)** स्त्री हम्+भा-हम्भ-अङ् वा । गवां ध्वनौ त्रिका० पृषो० । हम्बाप्यत्र हेमच० ।

**हम्म** गतौ भ्वा० प० सक० सेट् । हम्मति । अहम्मीत् ।

**हय** गतौ सक० क्लान्तौ अक० भ्वा० प० सेट् । हयति अहयीत् ।

**हय** पुंस्त्री० हय-हि-वा अच् । १घोटके अमरः स्त्रियां योपधत्वेऽपि हयगवयेत्यादिना ङीष् । अश्वशब्दे दृश्यम् । तत्र वर्ण्यपदार्थाः कविक० उक्ता यथा “चौनत्यं वेगओजश्च तथा सल्लक्षणस्थितिः । खुरोत्खातरजो रूपं जातिर्गतिर्विचित्रता” । तस्य शकुनादुक्तं वसन्तराजशाकुने यथा “हेषारवं मुञ्चति वामतोयः सुख च तिर्दक्षिणपादघाते । कण्डूयते दक्षिणमङ्गभागं तुङ्गं तुरङ्गः स पदं ददाति” ।

**हयकातरा** स्त्री हयः कातरो यस्याः ५त० । अश्वकातराख्यइक्षौ “कातरा हयपर्य्यायैः कातरान्तैः प्रकीर्त्तिता । अश्वकातरिका तिक्ता वातघ्नी दीपनी परा” राजनि० ।

**हयगन्ध** पु० हयस्येव गन्धोऽस्य । १काचलवणे २अश्वगन्धायाम् ३अजमोदायाञ्च स्त्री राजनि० ।

**हयग्रीव** पु० हयस्येव ग्रीवा ग्रीवाऽस्य । १विष्णोरवतारभेदे २दैत्यभेदे च “हयग्रीवेण युयुधे तत्र देवो जगत्पतिः । हयग्रीवं तत्र हत्वा मणिकूटं तथागमत्” कालिपु० ८२अ० । ३दुर्गायां स्त्री तन्मूर्त्तिलक्षणं अश्वशिरस्शब्दे ५१४पृ० दृश्यम् । ४राजर्षिभेदे “यद्वृत्तं पूर्वराजर्षे हयग्रीवस्य पार्थिव !” भा० शा० २४अ० ।

**हयग्रीवहन्** पु० हयग्रीवाख्यं दैत्यं हतवान् हन-क्विप् विष्णौ हेमच० ।

**हयङ्कष** पु० हयमश्वं कषति कष-खच् । १मातलौ इन्द्रसारथौ त्रिका० । २अश्वचालके च ।

**हयन** न० हि-गतौ करणे ल्युट् । कर्णीरथे अमरः ।

**हयपुच्छी** स्त्री हयस्य पुच्छाकारोऽस्त्यस्याः अच् गौरा० ङीष् । माषपर्ण्याम् अमरः ।

**हयप्रिय** पु० ६त० । १यवे हेमच० । २अश्वगन्धायां ३खर्जूर्य्यांच स्त्री राजनि० ४अश्वबल्लभे त्रि० । हयेष्टादयोऽप्यत्र

**हयमार** पु० हयं मारयति निम्बवत्त्वात् मृ-णिच्-अण् । करवीरे राजनि० रत्ना० । तत्रैव अमरः । [शब्दच०]

**हयमारण** पु० हयं मारयति मृ-णिच्-ल्यु । अश्वत्थे

**हयवाहन** पु०हयो वाहनमस्य । सूर्य्यपुत्रे रेवन्ते हेमच० । २अश्ववाहनयुक्ते त्रि० । ६त० । ३अश्वस्य चालने न० ।

**हयवाहनसङ्कर** पु० हयस्य वाहनं चालनं संकिरति सम्+कृ-अच् । रक्तकाञ्चने शब्दच० ।

**हयशाला** स्त्री ६त० । अश्वशालायां तत्करणप्रकारादि मत्स्यपु० १६१अ० उक्तं यथा “गवां स्थानं तथैवाश्व तुरगाणां तथैव च । उत्तराभिमुखी श्रेणी तुरगाणां विधीयते । दक्षिणाभिमुखी वाथ पश्चिमास्तु गर्हिताः । तुरगास्तु तथा धार्य्याः प्रदीपैः सार्वरात्रिकैः । कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! । धारयेदश्वशालायां सवत्सां धेनुमेव च । अजाश्च धार्य्या यत्नन